M. T. B. COLLEGE, SURAT

Manuscripts Library

No. Ref.

Ser. 299

Title Dhanishtha Shanti

299

Incomplete

Dhanishthā shānti	Title
	Author
	Editor
	Year, Vols.
	Publisher
299 Ends abruptly	Remarks

श्रीगणेशायनमः ॥ अथधनिष्ठादिपंचकमृतसंस्कारविधिः ॥ गरुडपुराणे· आदौकृत्वा
धनिष्ठार्धं एतन्नक्षत्रपंचकं ॥ रेवत्यंतंतदादूष्यमशुभंसर्वदाभवेत् · ॥ दाहस्तत्रनकर्त्त
व्योविनाशःसर्वजातिषु ॥ नजलंदीयतेतेषुनशुभंसर्वथाभवेत् ॥ पंचकानंतरंकार्यंक
र्तव्यंसर्वमन्यथा ॥ पुत्राणांगोत्रिणांतस्यसंतापोप्युपजायते ॥ गृहेहानिर्भवेत्तत्र
ऋक्षेष्वेषुमृतस्यच ॥ यद्वाप्राणात्ययदिनेविधिंकृत्वाततोदहेत् ॥ विधिर्यथा ॥ शव
स्याथसमीपेतुक्षेप्तव्याःपुत्तलास्तथा । दर्भमयास्तुचत्वारऋक्षमंत्राभिमंत्रिताः ॥
यद्यप्यत्रचत्वारइत्युक्तं ॥ तथापिपंचमीपादयोर्दध्यादितिविनियोगवाक्येपंचम्या
उपादानादत्रापिपंचेतिज्ञेयं· ततोदाहःप्रकर्तव्यस्तैश्चपुत्तलिकैःसहेति· ब्रह्मपुराणेपि·
कुंभमीनस्थितेचंद्रेमरणंयस्यजायते· नतस्योर्ध्वगतिर्दृष्टासंततोनशुभंभवेत् ·न
तस्यदाहःकर्त्तव्योविनाशास्वेषुजंतुषु· पंचकानंतरंकार्यंकर्मदाहादिकंखलु·अ

थवातद्दिनेकार्योदाहस्तुविधिपूर्वकं· धनिष्ठापंचकेजीवोमृतोयदिकथंचन·त्रिपु
ष्करेयाम्यभेचकुलजान्मारयेद्ध्रुवं· त्रिपुष्करलक्षणंवक्ष्यंते· याम्यंभरणीनक्षत्रं·त
दनिष्टविनाशायविधानंसमुदीर्यते· दाहदेशेशवंनीत्वास्नापयेच्चप्रयत्नतः दर्भाणां
प्रतिमाःकार्याःपंचोर्णासूत्रवेष्टिताः यवपिष्टेनानुलिप्तास्ताभिःसहशवंदहेत्·प्रे
तवाहःप्रेतसखःप्रेतपःप्रेतभूमिपः ।प्रेतहर्तापिचमस्तुनामान्येतानिचक्रमात्·
शिरसिप्रथमंदद्याद्द्वितीयांनेत्रयोःक्षिपेत्· तृतीयांवामकुक्षौतुचतुर्थींनाभिदेश
के·पंचमींपादयोर्दद्याद्दुग्धपुष्पादिचर्चिताः· प्रतिमोपर्यथाज्येननामभिर्जुहुया
त्क्रमात्· उदधारांततोदत्वायमायसोममित्यथ· त्र्यंबकस्यापिमंत्रेणप्रत्येकंजुहु
यात्घृतं· ततःस्वसूत्रविधिनाकर्मदाहादिकंचरेत्· सांग्नेरास्यपंचरत्नंक्षिप्त्वादाहं
समाचरेदिति· ॥ अथस्पष्टप्रयोगःप्रतन्यते ॥ देशकालादिसंकीर्त्यअमुकगोत्र

स्यअमुकशर्मणः प्रेतस्य धनिष्ठापंचकमरणे त्रिपुष्करनक्षत्रमरणे भरणीनक्षत्रमर
णेविधिंभरणीनक्षत्रमरणविधिंवाकरिष्य इतिसंकल्प्य दर्भैः पंचप्रतिमां कृत्वोर्णाभि
संवेष्ट्य यवपिष्टेनानुलिप्य प्राणप्रतिष्ठां कृत्वा गंधमाल्यादिभिरलंकृत्य· प्रेतवहं प्रे
तसखं प्रेतपं प्रेतभूमिपं प्रेतहर्तेति क्रमेण नामानि कृत्वा दाहसमये प्रेतोपरि विन्य
सेत्· तद्यथा· प्रेतवहं शिरसि· प्रेतसखं नेत्रयोः प्रेतपं वामकुक्षौ· प्रेतभूमिपं नाभौ·
प्रेतहर्तारं पादयोर्निदध्यात्· तासामुपरि तत्वहाय स्वाहेत्यादिप्रयोगेण घृताहुतीर्हु
त्वा उदकधारां च दत्वा· यमाय सोमं त्र्यंबकं यजामहे इति मंत्राभ्यां पंचप्रतिमासु प्र
त्येकमाज्याहुतीर्हुत्वा स्वस्वशाखोक्तविधिना संस्कुर्यादिति· ॥ इति धनिष्ठापंचकत्रिपुष्क
रभरणीनक्षत्रमरणसंस्कारविधानं·॥ ॥अत्रैव सूतकानंतरं कार्यं विशेष उक्तो ब्राह्मे·
सूतकांते ततः पुत्रः कुर्याच्छांतिकपौष्टिकं· कांस्यपात्रस्थितं तैलं वीक्ष्य दद्याद्द्विजन्म
ने· एकाशीतिपलं कांस्यं तदर्धं वा तदर्धकं· नवषट्त्रिपलं वापि दद्याद्दोषापनुत्तये· ॥

२

ब्रह्मविष्णुमहेशेंद्रवरुणप्रीतये ततः माषमुद्गयवव्रीहिप्रियंग्वादि प्रयच्छति· स्वर्णदानं रुद्र
जाप्यलक्षहोमो द्विजार्चनं· गोभूदानं षडेतानि कुर्याद्दोषोपशांतये· यथाशक्त्याथवा का
र्यं जपहोमद्विजार्चनमिति· गारुडेऽपि· सूतकांते तदा पुत्रैः कार्यं शांतिकपौष्टिकं· पं
चकेषु मृतो यो सौ गतिं न लभते नरः। तिलाश्चैव हिरण्यं च तदुद्दिश्य घृतं दहेत्· स्वगृ
ह्योक्तविधानेन कृत्वाग्नेः स्थापनं ततः। अन्वाधानं निर्वपणं देवतानां तथाहुतिः। यमा
य धर्मराजाय मृत्यवे चांतकाय च· वैवस्वताय कालाय सर्वभूतक्षयाय च· औदुंबराय द
ध्नाय नीलाय परमेष्ठिने· वृकोदराय चित्राय चित्रगुप्ताय वै क्रमात्· विधिना श्रपणं कृ
त्वा एवैकामाहुतिं हुनेत्· एवं कृते विधानेस्मिन्सर्वदोषः प्रणश्यतीति· अथैषां वचना
नामेकवाक्यतया संदर्भ्य प्रयोगः प्रोच्यते·॥ आचम्य प्राणानायम्य देशादि संकी
र्त्य अमुकगोत्रस्यामुकनाम्नो धनिष्ठापंचकादिमरणसूचितदुर्गतिवंशारिष्टाद्युप
शमार्थं तथा सपरिवारस्य मम शंकितारिष्टनिवृत्त्याभ्युदयार्थं च शांतिं करिष्ये इति सं

ध॰शां॰ कल्यगणेशं संपूज्य॰ पुण्याहं वाचयित्वा जपहोमार्थम् ऋत्विजो वृत्वा शुद्धभूभागे गोमये
नोपलिप्तायां संप्रोक्ष्य धान्योपरि ताम्रकलशमव्रणमेकं मंत्रपूर्वकं स्थापयित्वा॰ त
२ त्र सर्वौषधीः प्रक्षिप्याथ नक्षत्रसूक्तैः पंचाग्न्युत्तारणपूर्वकं यथायोग्यं प्रतिष्ठाप्य कल
शोपरि संवेष्ट्य स्थापयित्वा षोडशोपचारैः पूजयेत्॰ तत्र धनिष्ठादेवता वसवः। शत
तारकादेवता वरुणः। पूर्वाभाद्रपदादेवताऽजैकपात्॰ उत्तराभाद्रपदादेवताऽहिर्बुध्न्यः।
रेवतीदेवता पूषा॰ इति धनिष्ठापंचकदेवताः। त्रिपादे तु यन्नक्षत्रे मृतस्तन्नक्षत्रदेव
ता॰ भरणीनक्षत्रदेवता तु यमः। तत्रैक एव कुंभः स्थाप्य॰ एता देवता यथायोगं तल्लिंगकै
र्वेदमंत्रैर्नाममंत्रैर्वा संपूज्य॰ ब्रह्मविष्णुमहेशेंद्रवरुणेति देवतापंचकपूर्वकलशकल
शांतरेषु नाममंत्रैः संपूज्य ब्रह्मादिपंचदेवताग्रे माषमुद्गयवव्रीहिप्रियंग्वादिधान्य
राशिं कृत्वाथैकस्मिन्कुंभे यममंत्रेण यममावाह्योपचारैः संपूजयेत्॰ चतुर्दशयमनामभिः ३
अथ ऋत्विजः कुंभाभिमंत्रणपूर्वकं शांतिसूक्तं पवमानसूक्तं रुद्रसूक्तं च जपेत्॰ यद्वाया